उपशास्त्री - I खण्ड साहित्य - तृतीय - पत्रम्
रघुवंश महाकाव्यम्
द्वितीयः सर्गः

प्र० (1) - मान्यः स मे स्थावरजङ्गमानां सर्गस्थितिप्रत्यवहारहेतुः ।
गुरोरपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयम् ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके राजादिलीपः सिंहम्प्रति कथयति - बाणप्रयोगे राज्ञो दिलीपस्य सर्वप्रथमोऽयं पराभवोऽभी इन्द्रस्यापि पूर्वमीदृश एव पराजयो जात आसीत । एवञ्च व्यर्थ प्रयासो दिलीपः सिंहस्य समयोचितं प्रत्युत्तरं ददौ । त्रिपुरदाहावसरे पार्वतीक्रोडस्थिते बालस्वरूपिणि शिवे वज्रं मोक्तुमिच्छन्निन्द्रस्तदवलोकनात् कुण्ठित बाहुर्बभूवेति महाभारतीया कथाऽत्रानुसन्धेया। 'बाहु सवज्रं शक्रस्य क्रुद्धस्यास्तम्भयत् प्रभुः।'

व्याख्या: - स्थावरजङ्गमानां = चराचराणाम्, सर्गस्थितिप्रत्यवहारहेतुः = सृष्टिपालनविनाशकारणम्, सः = भगवान् सदाशिवः मे = मम, मान्यः = पूज्यः एव। अत्रापि पुरस्तात् = अग्रे, नश्यत् = विनश्यत्, आहिताग्नेः = अग्निहोत्रिणः, गुरोरपि = वसिष्ठस्यापि, धनं = गोरूपमिदं वित्तम्, अनुपेक्षणीयं = मया नोपेक्षितव्यम् ।

Renu Devi
27/09/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया

शास्त्री - I खण्ड		साहित्य
अभिज्ञानशाकुन्तलम्

Date __/__/__

प्र० (1) – पृष्टो जनेन समदुःखसुखेन बाला
नेयं न वक्ष्यति मनोगतमाधिहेतुम् ।
दृष्टो निवृत्य बहुशोऽप्यनया सतृष्ण
मत्रान्तरे श्रवणकातरतां गतोऽस्मि ॥

उत्तरम् – प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञान-शाकुन्तलम् नाट्यशास्त्रस्य तृतीयोऽङ्कात् उद्धृतोऽस्ति। अस्मिन् श्लोके राजा दुष्यन्तः शकुन्तलाया आतङ्क निमित्तमुद्दिश्य सख्योः प्रश्नमाकर्ण्य किमियमुत्तरयतीति शङ्कमानो राजा दुष्यन्तः स्वयमेव विमृशति – इयं = एषा सखीभ्यामातङ्कहेतुं पृच्छ्यमाना बाला = षोडशवार्षिकी शकुन्तला दुःखं = क्लेशः सुखं = हर्षश्चेति समदुःखसुखे समे = तुल्ये दुःखसुखे = प्रतिकुलानुकूलवेदने यस्य तेन समदुःखसुखेन यद्वा समं तुल्यं दुःखं सुखं यस्य तेन दुःखेषु च तुल्यमेव दुःखं सुख चानुभवता जनेन – सखीजनेन पृष्टा = अनुयुक्ता सती मनोगतं = हृदयकोणनिगूहितम् आधिहेतुं = मानसिकक्लेशकारणं न वक्ष्यति न = अवश्यमभिव्यास्यत्येव (नञ् द्वौ प्रकृतार्थदार्ढ्यं तोधयतः) अनया = शकुन्तलया बहुशः = अनेकवारम् मुखं विवृत्य = परावृत्य सतृष्णं = साभिलाषं दृष्टोऽपि = प्रेक्षितोऽपि कृतदर्शनोऽपि अहम् अत्रान्तरे = अस्मिन् अवकाशे सखीजनप्रश्न शकुन्तलाप्रतिवचनयोर्मध्ये श्रवणकातरतां – श्रवणे = शकुन्तलोत्तरश्रवणे कातरतां = भीरुतां गतः = प्राप्तः, अस्मि भवामि। किमियमभिव्यास्यति = किंनिमित्तास्था पीडिति श्रवणे कातरोऽस्मीति भावः। अत्र काव्यलिङ्गवृत्यानुप्रासावलङ्कारौ वृत्तं च वसन्ततिलका ।

Renu devi
27/09/20
राधा उमा कान्त सं० महाविद्यालय सुखसेना,
पूर्णिया ।

Page No. ____

शास्त्री - प्रखण्ड साहित्य

रघुवंश - महाकाव्यम्

त्रयोदशः सर्गः

Saathi

Date __/_09/____

प्र० (1) - मातङ्गनक्रैः सहसोत्पतद्भिर्भिन्नान्द्विधा पश्य समुद्रफेनान्।
कपोलसंसर्पितया य एषां व्रजन्ति कर्णक्षणचामरत्वम्॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य त्रयोदशसर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके श्रीरामः जनकतनयाम्प्रति कथयति - अयि प्रिये! सहसा पार्श्वपरिवर्तनं कुर्वद्भिः गजाकारैर्ग्राहैः द्विधा विभक्तान् फेनान् पश्य, ये तेषां गजमकराणां कपोलसंस्पर्शनेन कर्णयोः भयमात्रं शुभ्रत्वात् चामरा इव प्रतीयन्त इति भावः।

व्याख्याः - अयि देवि! सहसा = अतर्कित एव। उत्पतद्भिः = ऊर्ध्वं व्रजद्भिः। मातङ्गनक्रैः = गजाकारैर्मकरैः। द्विधा = प्रकारद्वयेन। भिन्नान् = विभक्तान्। समुद्रफेनान् = सागरफेनान्। पश्य = अवलोकय। ये = फेनाः। एषाम् = मातङ्गनक्राणाम्। कपोलसंसर्पितया = गण्डस्थलसंसर्पणेन। कर्णक्षणचामरत्वं = किञ्चित्कालं श्रोत्रचामरत्वम्। व्रजन्ति = प्राप्नुवन्ति।

Renu Devi
27/09/20
राधा उमाकान्त सं० महावि० सुरवसेना, पूर्णिया।

Page No.

उपशास्त्री - II खण्ड साहित्य

रघुवंश महाकाव्यम्

द्वितीयः सर्गः

Date ___/___/______

मूलम् - एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वम् ॥

सन्दर्भ - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति ।
अस्मिन् श्लोके सिंहः राजा दिलीपं प्रति कथयति -

व्याख्याः - एकातपत्रं = एकच्छत्रम् अप्रति द्वन्द्वं वा, जगतः = भूमण्डलस्य, प्रभुत्वं = ऐश्वर्यम्, नवं = नवीनम्, वयः = अवस्थाम्, इदं = पुरतो विभाव्यमानम्, कान्तं = मनोहरम्, वपुः = शरीरं च (एतत्सर्वं), बहु = विपुलम्, अल्पस्य हेतोः = अत्यल्पेन कारणेन, हातुं = त्यक्तुम्, इच्छन् = अभिलष्यन्, त्वं = भवान्, विचारमूढः = विमर्शविकलः, मे = मम, प्रतिभासि = प्रतीयसे । धेनुसंरक्षणात्मकाय यत्किञ्चित्फलायातिदुर्लभानि चक्रवर्तित्वराज्य - नवयौवन - सुन्दरशरीर - सुखानि जिहासन् त्वं मया विचारशून्यो दृश्यसे ।

Renu Devi
27/09/20

राधा उमाकान्त सं० महा वि० सुखसेना, पूर्णिया ।